International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2026; 3(1): 01-03
© 2026 IJMH
www.themultijournal.com
Received: 10-12-2025
Accepted: 02-01-2026
Publish : 03-01-2026

**श्रीनिवासुल.गोदा लक्ष्मी भगवती**
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**श्रीनिवासुल.गोदा लक्ष्मी भगवती**
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# तरिकोण्डवेङ्गमाम्बायाः तेलुगुसाहित्ये श्रीनिवासविलासचम्पूकाव्यप्रभावः

**श्रीनिवासुल.गोदा लक्ष्मी भगवती**

**कुञ्चिकापदानि : -** श्रीनिवासविलासचम्पूः, तरिकोण्डवेङ्गमाम्बा, संस्कृतसाहित्यम्, तेलुगुसाहित्यम्, चम्पूकाव्यम्, भाषाप्रभावः

**सङ्क्षेपः –** श्रीनिवासविलासकाव्यमिति चम्पूकाव्यं संस्कृतभाषायां श्रीवेङ्कटेशस्य माहात्म्यस्य कथनात्मकमस्ति। तरिकोण्डवेङ्गमाम्बा इति तेलुगुभाषाकवयित्री अत्यन्तं प्रसिद्धा। सा च श्रीवेङ्कटेश्वर-माहात्म्यमिति ग्रन्थं प्रणिनिनाय। तञ्च ग्रन्थं श्रीनिविलासचम्पूकाव्यप्रभावेणैवारचयिदिति विशदयति लेखोऽयम्।

### 1.भारतदेशे, एवं विश्वे तेलुगुभाषायाः स्थानम् -

संस्कृतम्, तमिळ्, कन्नड, तेलुगु इति सर्वकारसम्मतप्राचीनभारतीयभाषाचतुष्टये व्यवहर्तृसंख्याधिक्य-वशादग्रासने सुस्थिरा भाषा तेलुगु एवेत्यत्र न कस्यापि वैमत्यम्। विश्वेऽस्मिन् दशकोट्यधिकाः जनाः मातृभाषात्वेन तेलुगुभाषां व्यवहरन्ति। तत्र अष्टकोटिसंख्याकाः भारतदेशस्थ आन्ध्रप्रदेश, तेलगाणराज्ययोः एव निवसन्ति। एवञ्च तेलुगुभाषा विश्वभाषासु षष्ठे स्थाने, भारतीयभाषासु द्वितीयस्थाने दक्षिणभारते प्रथमस्थाने च राराज्यते।

### 2.अमरवाणी त्रैलिङ्गन्ती दृष्टिपथमायाति -

सार्धसहस्रद्वयाब्दकालात्पूर्वमेव शासनादिपुरावस्तुप्रमाणैः तेलुगुभाषोलब्धिः निश्चिताऽस्ति। परं क्रीस्तोः परं एकादशशताब्दीयो नन्नय्यभट्टारकः आदिकविरित्याद्रियते। यो ह्यस्माभिर्वागनुशासनः कीर्त्यते। तेन श्रीमन्महाभारतस्यान्ध्रीकरणं विहितम्। परं कविनामुना गैर्वाण्यामेव मङ्गलाचरणं कृतम्। तथा हि-

**श्रीवाणीगिरिजाश्चिराय दधतो वक्षोमुखांगेषु ये**
**लोकानां स्थितिमावहन्त्यविहतां स्त्रीपुंसयोगोद्भवाम्।**
**ते वेदत्रयमूर्तयस्त्रिपुरुषास्संपूजिता वस्सुरैः**
**भूयासुः पुरुषोत्तमाम्बुजभवश्रीकन्धराः श्रेयसे।।** [1]

अनेनैव श्लोकेन शासनेतरस्थतेलुगुसाहित्यारम्भो जातः।

द्राविडभाषाकुटुम्बान्तःपातिन्यां तेलुगुभाषायां कथं वा कवयः आन्ध्राणां साहित्यं निर्मातुं संस्कृतैकशरणाः बभूवुः अथवा अमरवाणी त्रैलिङ्गन्ती दृष्टिपथमायातीत्यत्र कानिचन उदाहरणानि समुपस्थाप्यन्ते।

### 3.नन्नय्यभट्टारकस्य शरद्रात्रीणां वर्णनमिदमवधार्यताम् -

**शारदरात्रुलुज्वल लसत्तर तारकहारपंक्तुल न्**
**जारुतरंबुलय्ये, विकसन्नवकैरवगन्धबन्धुरो-**
**दारसमीरसौरभमु दाल्वि, सुधांशुविकीर्यमाण क-**
**पूरपरागपांडुरुचिपूरमु लंबरपूरितंबुलै ।।** [2]

**4.श्रीनिवासचम्पूः**

श्रीनिवासविलासचम्पूकारः श्रीवेङ्कटेशकविः क्री.श. 1705 तमवर्षीयः इति प्रामाणिकैः निश्चितोऽस्ति। अयं स्वग्रन्थे भगवतः श्रीनिवासस्य वैभवं भगवता वेदव्यासमहर्षिना प्रणीतं पुराण-समुदायगतश्रीनिवासस्य इतिवृत्तमनुसृत्यैव रचितवान्। अस्य प्रणा-लीमनुसृत्य तेलुगुसाहित्येऽपि श्रीनिवासप्रभोः विलासवर्णने कवयः कवयित्र्यश्च सम्प्रवृत्तात्याहो आश्चर्यम् ।

**5.तरिकोण्डवेङ्कमाम्बायाः साहित्ये तस्य प्रभावः**

परमभागवतोत्तमा श्रीनिवासभक्ताग्रगण्या श्रीमती तरिगोण्ड वेङ्कमाम्बा सुप्रसिद्धा तेलुगु कवयित्री तादृशसाहित्यनिर्माणे अग्र-गण्या अस्ति। तया महाभागया स्वकीये **श्रीवेङ्कटाचलमाहत्यमु** इत्याख्ये तेलुगुकाव्ये श्रीनिवासविलासचम्पूसरणिः आदृतास्ति। यथा– श्रीनिवासविलासचम्पूकारः पुराणवाङ्मयमनुसृत्य स्वग्रन्थे-तिवृत्तं निर्मितवान्, तथैवेयं कवयित्री क्रि.श.1840 वर्षसमीपवर्तिनी स्वकीये काव्ये प्रथम- द्वितीय– तृतीयाश्वासेषु वाराहपुराणनुसारं चतुर्थाश्वासे भविष्योत्तरपुराणानुसारं तथा – षष्ठाश्वासे पद्मपुरा-णानुसारं इतिवृत्तग्रथनमकरोत्।

**6.कविस्तुतिः**

**सी। आदिकवीश्वरुंडैन वाल्मीकिकि**
**व्यासमौनिकिँ गाळिदासकविकि**
**नरयंग वरलब्ध मन्न माचार्युन**
**कांध्र भाषाकवित्वाब्यु लगुचुँ**
**दनरुनन्न यनु दिक्कनसोमयाजिकिँ**
**बोतराजुनकुनु नीतुलयिन**
**कवुलकुँ बंडिताग्रणुलकुँ बौराणि**
**कुलकु भक्तिनि म्रोक्किकोनुचु नेनु।**
**ते। वेंकटाचलमाहात्म्यविभवमुलनु**
**बद्यरीतिनि रचियिंचि भक्ति मेऱय**
**श्रीनिवासुनिपाद राजीवमुलकुँ**
**बोसँग नर्पिंतु मोक्षंबुँ बोंदुकोऱकु।**
**सी। पंडिताग्रणुलार प्रजलार यिपुडु ना**
**बालभाष कसूयपडक विनुँडु**
**तल्लिदंड्रुलु चिन्न पिल्ल लपल्कुल**
**कानंद मोंदेडुनट्ल यिंदु**
**मीरु नातप्पोप्पु लेरीतिगानैन**
**गेलि सेयक चित्तगिंपवलयु**
**नांध्र गीर्वाणमहाकृतु लुंडँगा**
**निप्पु डीकृति विन नेल यनक**
**ते। भक्ष्यमुलु मेक्कि यावलँ बच्चडियुनु**
**नंजुकोनिनविधंबुन नाप्रबंध**
**मालकिंतुरटंचुँ बेरास चेत**
**नेनु रचियिंतु दीनि मन्निंचि गनुँडु।**[3]

एवं रीत्या पूर्वकवीन् वाल्मीक्यादीन् सम्प्रार्थ्य स्वग्रन्थे स्वाभिमतम् पुराणेभ्यः संगृह्य यथा श्रीनिवासविलासचम्पूग्रन्थकारः स्वग्रन्थं प्रणिनाय तथैवेयमपि स्वाभिमतं वस्तु विविधपुराणेभ्यः संगृह्य **श्रीवेङ्कटाचलमाहात्यमु** तेलुगुभाषायां श्रीवेङ्कटाचलस्य माहात्म्य-म् अधिकृत्य मोक्षार्थं सकलकाव्यगुणोपेतम् काव्यं प्रणिनाय।

**सर्वज्ञुंडगुमद्गुरुं गोलिचि मश्रांतंबु सद्भक्तिचे**
**निर्वाणप्रदुँ औविनायकुनि वाणिन्वाडि तोल्लिंटि स**
**द्गीर्वाणंध्र कवींद्रुलं दलँचि यक्षीणात्मबोधोल्लस**
**त्पूर्वाचार्युल पाद पद्मयुगमुल् पूजिंतु निष्ठासिकिन्।।**
**सी। अनि यिष्टदेवता प्रार्थनं बोनरिंचि**
**वेङ्कँगोल्पेडु घन वेंकटाद्रि**
**माहात्म्यमुननु वराहपुराणंबु**
**मुप्पदियध्यायमुलनु दोलुत**
**मोनसि मूँडाश्वासमुलु चेसियावरा**
**हस्वामि कर्पिंचि यवल नेडँद**
**रहिनि भविष्योत्तरपुराणमुन श्रीनि**
**वासुविलासमु ल्वसुधयंदुँ।**[4]

अत्र सर्वज्ञंडगुगु इत्यारभ्य प्रणीते पद्ये तोल्लिंटि स द्गीर्वाणंध्र कवींद्रुलं दलँचि इत्यनेन पूर्वतनान् सद्गीर्वाणान्द्रकवीन्द्रान् सस्मृत्य, अनि इष्टदेवतानाम् इतिपद्ये कियान् भागः वराहपुराणात् गृहीतः कति अध्यायेषु संगृहीतः इति विषयं उक्त्वा भविष्योत्तरपुराणात् गृहीतांशविषये लिखन्ती वेङ्कमाम्बा –

**ते। ब्रजकुँ देलियंगँ देटगँ बद्यरीति**
**धृति रचिंतुनु दरिकुंड नृहरिकृपनु**
**दप्पुलुंडिनँ दग दिद्दि योप्पुगानु**
**चदुव नेंचेद बुधुलार सदयुलारा।**[5]

**श्रीनिवासुविलामु**ल्वसुधयंदुन् ब्रजकु देलियंग देटगपद्यरीति धृतिरचिंतुनु दरिकुंड नृहरिकृपनु इत्यत्र श्रीनिवासविलासमु इति श्रीवेङ्कटेशकवेः श्रीनिवासविलासकाव्यमेव स्मृतवती इति वक्तुं न कस्यापि संदेहो भवेत्।

अन्यदपि प्रमाणमस्ति। तस्याः वेङ्कमाम्बायाः इष्टम् दैवम् तदी-यग्रामे विराजमानः भगवान् श्रीन्नृसिंहः। तत्कृपयैव श्रीवेङ्कटाचल-माहात्यमु प्रणीतवती इत्यवोचत्। अतः इयम् न केवलं श्रीवे-ङ्कटेशकवेः श्रीनिवासविलासचम्पूकाव्यनाम श्रुतवती। तत् काव्यम् सम्यग्विलोक्य स्वाभिलषितरीत्या श्रीवेङ्कटेशकवेः प्रणालीं मनसि-निधायैव स्वकाव्यं प्रणीतवती इत्यत्र न कस्यापि वैमत्यम्।

**भवसिन्धुपारगमने कवितामार्गप्रकाशनेऽपि मम।**
**मानवमृगराजगुरोः सेवोडुपतरणिसरणिमावहतु।।**[6] इति।।

श्रीनिवासविलासचम्पूकारः गुरुवन्दनमाचरितवान्। अस्य गुरुः नरसिंहाख्यः वेङ्कटाचलमाहात्म्यमु कवयित्र्याः इष्टं दैवं नारसिंहः। एवं बहुषु विषयेषु स्वस्वग्रन्थनिर्माणे श्रीवेङ्कटेशकवेः तरिगोण्ड वेङ्कमाम्बायाः तौल्यमस्ति।

**उपसंहारः**

अत इदम् निश्चीयते यत् श्रीवेङ्कटेशकविकृतश्रीनिवासविलास-चम्पूकाव्यस्य तत्प्रणयणसमकालादेव लोकप्रियता समधिगता। अत एव इदमप्युन्नीयते यत् श्रीनिवासविलासचम्पूकाव्यस्य आन्ध्री-करणमपि कर्तुं कवयः समुद्यता आसन्। तादृशेषु कवयित्रीमणिरियं श्रीवेङ्कटाचलमाहात्यमु इत्याख्यं आन्ध्रमहाकाव्यं श्रीवेङ्कटेशकवेः श्रीनिवासविलासचम्पूकाव्यस्य अनुसृजनात्मकं प्रणीय धन्य-धन्याभवत्।

**उपयुक्तग्रन्थसूची**


1.काव्यमाला.33, श्रीनिवासविलासचम्पूः, निर्णयसागराख्ययन्त्रा-लयः, मुब्बाई.1933

2.श्रीनिवासविलासचम्पूः सम्पादिका डा.सि.ललिताराणी, राष्ट्रिय-संस्कृतविद्यापीठम्, तिरुपतृः, 2010

3.श्री.वेङ्कटाचलमाहात्म्यम् – सम्पादकः – प्रो.एस्.बि.रघुनाथा-चार्यः, तिरुमलतिरुपतिदेवस्थानमम्, तिरुपतिः-1991.

4.श्रीवेङ्कटाचलमाहात्म्यमु- Published by V.Venkateswara Sastrulu of V.Ramaswamy Sastrulu & Sons, Madras – 1937.

5.श्रीमदान्ध्रमहाभारतमु – Published by Tirumala Tirupati Devasthanamu, Tirupati.


**संदर्भ**

1. श्रीमद् आन्ध्रमहाभारतमु आदिपर्व 1.1

2. श्रीमद् आन्ध्रमहाभारतमु, 4.श्लो.141

3. श्रीवेङ्कटाचलमाहात्म्यम्.पृ.सं.4-5

4. श्रीवेङ्कटाचलमाहात्म्यम्.पृ.सं.196

5. श्रीवेङ्कटाचलमाहात्म्यम्.पृ.सं.196

6. श्रीनिवासविलासचम्पूः उच्छवासः.1.श्लो.2